# Shri Shakambhari Pratahsmaranastotram

# શ્રીશાકમ્ભરીપ્રાતઃસ્મરણસ્તોત્રમ્

## Document Information

Text title : shAkambharI or vanashankarI prAtaH smaraNa stotram

File name : shAkambharIprAtaHsmaraNastotram.itx

Category : suprabhAta, devii, shAkambharI, devI

Location : doc_devii

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : April 2, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

Shri Shakambhari Pratahsmaranastotram

# શ્રીશાકમ્ભરીપ્રાતઃસ્મરણસ્તોત્રમ્

પ્રાતઃ સ્મરામિ તવ શઙ્કરિ વક્ત્રપદ્મં
    કાન્તાલકં મધુરમન્દહસં પ્રસન્નમ્ ।
કાશ્મીરદર્પમૃગનાભિલસલ્લલાટં
    લોકત્રયાભયદચારુવિલોચનાઢ્યમ્ ॥ ૧॥
પ્રાતર્ભજામિ તવ શઙ્કરિ હસ્તવૃન્દં
    માણિક્યહેમવલયાદિવિભૂષણાઢ્યમ્ ।
ઘણ્ટાત્રિશૂલકરવાલસુપુસ્તખેટ-
    પાત્રોત્તમાઙ્ગડમરૂલ્લસિતં મનોજ્ઞમ્ ॥ ૨॥
પ્રાતર્નમામિ તવ શઙ્કરિ પાદપદ્મં
    પદ્મોભવાદિસુમનોગણસેવ્યમાનમ્ ।
મઞ્જુક્વણત્કનકનૂપુરરાજમાનં
    નન્દારુવૃન્દસુરવીરુધમાર્યહૃદ્યમ્ ॥ ૩॥
પ્રાતઃ સ્તુવે ચ તવ શઙ્કરિ દિવ્યમૂર્તિં
    કાદમ્બકાનનગતાં કરુણારસાર્દ્રીમ્ ।
કલ્યાણધામ નવનીરદનીલભાસાં
    પઞ્ચાસ્યયાનલસિતાં પરમાર્તિહન્ત્રીમ્ ॥ ૪॥
પ્રાતર્વદામિ તવ શઙ્કરિ દિવ્યનામ
    શાકમ્ભરીતિ લલિતેતિ શતેક્ષણેતિ ।
દુર્ગેતિ દુર્ગમમહાસુરનાશિનીતિ
    શ્રીમઙ્ગલેતિ કમલેતિ મહેશ્વરીતિ ॥ ૫॥
યઃ શ્લોકપઞ્ચકમિદં પઠતિ પ્રભાતે
    શાકમ્ભરીપ્રિયકરં દુરિતૌઘનાશમ્ ।
તસ્મૈ દદાતિ શિવદા વનશઙ્કરી સા
    વિદ્યાં પ્રજાં શ્રિયમુદારમતિં સુકીર્તિમ્ ॥ ૬॥

ઇતિ શ્રીશાકમ્ભરીપ્રાતઃસ્મરણસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Sunder Hattangadi

*Shri Shakambhari Pratahsmaranastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*